# Setubandha 2021-22 - 30 Days

## सेतुबन्धसाहित्यम् – संस्कृतम् (प्रथमभाषा/तृतीयभाषा)

अष्टमकक्ष्या : 8th Std. F.L./T.L Samskritham- Setubandha.

| दिनानि | लक्षिताधिगमः | अधिगमांशाः | क्रियाकलापाः | निर्वहणसूचनाः |
|---|---|---|---|---|
| १. प्रथमदिनम् | संस्कृतगीतगानम् । स्वपरिचयः । रसनासंस्कारः । | पठामि संस्कृतं.. पठतसंस्कृतम् । सरलवाक्यैः स्वरपरिचयः । मम नाम, भवतः नाम इत्यादीनि नित्योपयोगीनि वाक्यानि । | छात्राणाम् अनुगानम् । आचार्यः सम्भाषणसोपानक्रमेण बोधयति साभिनयम् । | श्राव्यमाध्यमयन्त्राणि उपयुज्य गानश्रावणम् । अध्यापकः लेखनेन विना अभिनयपूर्वकं बोधयतु । |
| २. द्वितीयदिनम् | सर्वनामशब्दानां ज्ञानम् । लिङ्गपरिचयः । | तद्, एतद्, किम्,अस्मद्, युष्मद् इत्यादीनि कानिचन सुबन्तरूपाणि । शब्दानां पुँल्लिङ्गस्त्रीलिङ्गनपुंसकलिङ्गानां परिचयः । | सः बालकः । सा बालिका । तत् पुस्तकम् इत्यादीनि साभिनयं परस्परं प्रदर्शयन्ति । | शिक्षकस्य अभिनयः अत्र प्रमुखं पात्रं वहति । प्रत्यक्षपद्धत्या बोधनम् । |
| ३. तृतीयदिनम् | वस्तूनां ज्ञानम् । | शालालभ्यवस्तूनि । त्रिषुलिङ्गानां परिचयः । अस्ति –नास्ति इति पदानाम् उपयोगः । | उदा– चित्रपटप्रदर्शनम् । वस्तूनि प्रदर्श्य छात्राः तत् किमिति पृच्छन्ति । | आचार्यः वस्तूनि प्रदर्श्य (दूरात् समीपात् च) तस्य नाम वदतु । |

| | | | | |
|---|---|---|---|---|
| ४. चतुर्थदिनम् | तिङन्तस्य परिचयः | क्रियापदानि । लकारज्ञानेन विना.... पठति, लिखति, खादामि, धावन्ति इत्यादीनि । | प्रत्यक्षपद्धत्या विवरणम् । अभिनयपूर्वकं क्रियापदोच्चारणम् । सूचितक्रियापदानां लेखनम् । | छात्राणां साहाय्येन विवरणं करोतु । क्रियापदानां स्फोरकपत्राणां सिद्धता । पि.पि.टि. अपि कर्तुं शक्नोति । |
| ५. पञ्चमदिनम् | वचनज्ञानम् । विभक्तिप्रवेशः । | एकवचनम्, द्विवचनम् बहुवचनम् । विशेषस्य द्विवचनस्य उपयोगः । त्रिषुलिङ्गेषु अपि वचनप्रयोगः । षष्ठीविभक्तिपरिचयः । | चित्रपटद्वाराः वचनानां निरूपणम् । छात्राः वचनपरिवर्तनम् अभ्यस्यन्ति । | दृश्यश्रव्यमाध्यमस्य प्रयोगं करोतु । चार्ट् अपि निर्माणं करोतु । छात्राणां गणद्वारा निर्मातुम् अपि शक्यते । |
| ६. षष्टदिनम् | वर्णमालायाः ज्ञानम् । | स्वराः तेषां भेदाः । अयोगवाहौ पुनः भेदौ । वार्गीयव्यञ्जनानि अवर्गीयव्यञ्जनानि, पुनः अल्पप्राणेत्यादयः विभागाः । | स्फोरकपत्राणाम् उपयोगः भित्तिचित्रपटाः । अक्षरक्रीडाः । गीतगानम् । सचित्रवर्णलेखनम् । उक्तलेखनम् । | अक्षराणां विभिन्नवर्णेन स्फोरकपत्राणां निर्माणं भवतु। वर्णमालायाः वर्णानाम् उच्चरणम् अनूच्चारणं च भवतु । यू ट्यूब् चलच्चित्राणि प्रदर्शयतु । कृष्णपलकस्यापि उपयोगः कार्यः । |
| ७. सप्तमदिनम् | गुणिताक्षराणां ज्ञानम् । | पूर्णाक्षराणां नाम गुणिताक्षराणां निर्माणं यथा... क्+इ–कि \ च्+उ=चु \ प्+ए=पे \ ल्+औ=लौ इत्यादीनि । एवं क्रमेण क का कि की .... निर्माणं | भित्तिपत्रप्रदर्शनम् । पठनम् । स्फोरकपत्राणां प्रदर्शनपूर्वकं पठनम् । कृष्णफलके गुणिताक्षरलेखनम् । | स्फोरकपत्राणां निर्माणं भवतु । कृष्णपलके बहुवर्णसुधाखण्डानाम् उपयोगः भवतु । कृष्णफलकलेखने छात्राणाम् अवकाशं ददातु । |

| | | | | |
|---|---|---|---|---|
| | | पठनम् । एतैः सरलपदनिर्माणम् । | | |
| ८. अष्टमदिनम् | गुणिताक्षराणाम् अभ्यासः । | क् – ह् पर्यन्तव्यञ्जनानां पूर्णाक्षराणि । | चिताः छात्राः श्यामफलके लिखन्ति । शिक्षकः साहाय्यमाचरति । अन्ये स्वीये पुस्तेके लिखन्ति । | पि.पि.टि. निर्माणमपि कुर्वन्तु । विविधवर्णसुधाखण्डाः भवन्तु । गृहकार्यम् अपि यच्छन्तु । |
| ९. नवमदिनम् | पुँल्लिङ्गशब्दानां परिचयः | राम, गज, गोविन्द, वृक्ष, मार्ग, दीप इत्यादयः । तेषां प्रथमाविभक्तिवचनत्रयरूपाणि । यथा.. गजः गजौ गजाः.... | अकारान्तपुल्लिङ्गशब्दानां प्रथमावि.रूपाणां रटनम् । छात्राः अनुवदन्ति । | संस्कृतभारत्या प्रकाशिताः बोधनसामग्रीः प्राप्नोतु । छात्राः शब्दान् उक्त्वा लिङ्गविषये पृच्छन्ति । पुँल्लिङ्गशब्दान् एव योजयतु । |
| १०. दशमदिनम् | स्त्रीलिङ्गशब्दानां परिचयः । नपुंसकलिङ्गपदानाम् अपि परिचयः | आ कारान्ताः स्त्रीलिङ्गशब्दाः – लता, कला, माला, शाला, रमा, सीता, इत्यादयः । वन, पुस्तक, फल, ज्ञान, इत्यादयः च । | अर्थसहितं स्त्रीलिङ्गपदानां बोधनम् । छात्राः स्वयं सङ्गृह्णन्ति । आचार्यः साहय्यमाचरति । नपुंसकलिङ्गपदानां विषये अपि एवमेव । | आचार्यः छात्राणां कृते स्पष्टतां यच्छतु यत् अर्थानुगुणं शब्दस्य लिङ्गनिर्धारणं न । शब्दस्य लिङ्गं निश्चितं भवति इति । तज्ज्ञात्वा एव अर्थावगमनम् इति । |
| ११. एकादशमं दिनम् | स्तोत्राणां ज्ञानम् । | विविधदेवतानां सरलस्तोत्राणि । वक्रतुण्डमहाकाय...... । नमस्ते शारदे..... । रामाय राम..... । मनोजवं.... । इत्यादीनि । | आचार्यः सुस्वरः गायति । छात्राः श्रुण्वन्ति क्रमेण अनुगायन्ति । स्तोत्राश्रितदेवानां चित्राणि लिखन्ति सङ्ग्रह्णन्ति च । | छात्रसमूहैः गापयतु । श्रेष्ठगायकैः गीतानि सङ्ग्रह्य श्रावयतु । शिक्षकः भक्त्या स्वयं गायतु । प्रार्थना विषये किञ्चित् वदतु । |
| १२. द्वादशमं दिनम् | सचित्रपदकोशावलोकनम् | चित्रनामयुक्तानि पुस्तकानि । | वृत्तपत्रिकातः | संस्कृतभारतीप्रकाशितानि |

| | | | | |
|---|---|---|---|---|
| | [ ।<br>शब्दानां लिङ्गज्ञानम् । | चित्रपटाः । पि.पि.टि. प्रयोगः । | चित्रसङ्ग्रहणम् ।<br>देवतानुगुणं संयोजनम् ।<br>स्वयं सरागं गानम् ।<br>चित्ररचनम् च ।<br>लिङ्गानुगुणं देवताशब्दानां चयनम् । | चित्रपदकोशपुस्तकानि प्राप्नोतु ।<br>पि.पि.टि. निर्माणं करोतु ।<br>श्रेष्ठगायकैः गीतानि स्त्रोत्राणि सङ्ग्रह्णातु । चित्राणां पटं रचयतु । |
| | | | | |
| १३. त्रयोदशमं दिनम् | तद् एतद्<br>पुँल्लिङ्गनपुंसकलिङ्ग शब्दपरिचयः । | सः तौ ते । तत् ते तानि ।<br>एषः एतौ एते । इत्यादयः ।<br>सः बालकः । एषः वृक्षः ।<br>ते बालकाः । तानि पुस्तकानि । इत्यादीनि । | प्रत्यक्षपद्धत्या आचार्यविरणम् । वस्तूनि प्रदर्श्य विविरणम् । छात्राः लिखन्ति । | शालालभ्यवस्तूनां सङ्ग्रहः कार्यः । स्फोरकपत्राणां सिद्धता । छात्राः लेखनीयाः ।<br>दृश्यश्रव्योपकरणानां व्यवस्था ।<br>श्यामफलकस्य उपयोगः । |
| १४. चतुर्दशमं दिनम् | तद् एतद्<br>स्त्रीलिङ्गरूपाणां परिचयः । | त्रिषु वचनेषु प्रयोगः । एषा लता । एते बाले । एताः बालिकाः । एते आचार्याः ।<br>सा ते ताः । | प्रत्यक्षपद्धत्या आचार्यविवरणम् । छात्राणां साहाय्येन लेखनाभ्यासः | लेखनी इत्यादीनां शालालभ्यवस्तूनां प्रदर्शनम् ।<br>पि.पि.टि. निर्माणं भवतु ।<br>यूट्यूब् तः सङ्ग्रहः भवतु ।<br>स्फोरकपत्राणां निर्माणम् । |
| १५. पञ्चदशमं दिनम् | नामपदानि – पशुपक्षिपादपानां नामज्ञानम् । | सरलनामपदानि । धेनुः, शुनकः इत्यादिप्राणिनामानि ।<br>कपोतः शुकः पिकः इत्यादीनि खगनामानि । | निर्दिष्टपदानां श्यामफलकलेखनम् ।<br>छात्राः अनुलिखन्ति ।<br>छात्राः पशुपक्षिणां पटिटकारचनम् । | पिपिटि निर्माणं करोतु ।<br>चित्रपटानां सङ्ग्रहः कार्यः ।<br>चित्रपदकोशनिर्माणं कारयतु ।<br>संस्कृतभारतीप्रकाशनस्य चित्रपदकोशस्य साहाय्यं प्राप्नोतु । |

| | | | | |
|---|---|---|---|---|
| १६. षोडषं दिनम् | सङ्ख्या–सङ्ख्यावाचकज्ञानम् । | १,२,३,४,...... एकम् ....... पञ्चाशत् पर्यन्तं सङ्ख्याः सङ्ख्यावाचकानि च | सङ्ख्यागानं पाठयति आचार्यः । छात्राः अनुगायन्ति । सचित्रसङ्ख्यासंयोजनम् चित्रसङ्ख्यापटनिर्माणम् | यू ट्यूब् माध्यमात् सङ्ख्यावाचकसम्बद्धान् गानचयनं करोतु । ऒम् उच्चरणस्य सङ्ख्याक्रीडां ज्ञात्वा खेलयतु । |
| १७. सप्तदशं दिनम् | समयः–घटी ज्ञानम् । दिनचर्यारचनाभ्यासः । | वादनम् – घटीयन्त्रम् । समयस्य सूचनम् घटीचित्रम् अपि । एकवादनम् सपादैकवादनम् सार्धैकवादनम्, पादोनद्विवादनम्..... इत्यादिसमयवाचनम् । | घटीयन्त्रस्य शरान् परिवर्त्य समयसूचनं करोति आचार्यः । छात्राः अध्यापकस्य मार्गदर्शनेन भिन्नभिन्नसमयस्य घटीयन्त्रस्य चित्राणि लिखन्ति । | आचार्यः घटीयन्त्रम् अनयतु । भिन्नसमयानां चित्रपटमपि / स्फोरकपत्रमपि रचयतु । |
| १८. अष्टादशं दिनम् | द्वितीया–तृतीयाविभक्तिप्रयोजनम् । | सप्तविभक्तिषु द्वितीया विभक्तिः तृतीया विभक्तिः च । तयोः उपयोगोदाहरणानि । सरलवाक्यानि । चित्राणि च । छात्रः विद्यालयं गच्छति । आचार्यः लेखन्या लिखति । | स्फोरकपात्राणां प्रदर्शनेन बोधनम् । छात्राः चित्राणि दृष्ट्वा द्वितीयातृतीयाविभक्ति–रूपाणिसरलवाक्यानि वदन्ति । आचार्यः वस्तूनि प्रदर्शयति छात्राः द्वितीया/तृतीयाविभक्ति–रूपाणि वदन्ति । | फ्लोचार्ट् द्वारा विविधकर्मपदयुक्तानि वाक्यानि भवन्तु । वाक्येषु कर्मकरणपदानि अन्यवर्णेन लिखतु । चित्रपटे समानकर्तृक्रियायुक्तानि भिन्नभिन्नकर्मपद/करणपदयुक्तानि वाक्यानि भवन्तु । |
| १९. नवदशं दिनम् | चतुर्थीपञ्चमीविभक्तिज्ञानम् | चतुर्थीविभक्तिः, पञ्चमीविभक्तिः । | विभक्तिवल्लरी ग्रन्थस्य उपयोगेन बोधनम् । | शिक्षकः संस्कृतभारतीप्रकाशनस्य |

| | | | | |
|---|---|---|---|---|
| | | सरलवाक्यानि विभक्तिद्वयस्य उपयोगेन । पञ्चमीविभक्तियुक्तानि सरलवाक्यानि । कर्तृक्रियापदाभ्यां सह सम्प्रदानापादानपदप्रयोगः । | चतुर्थीविभक्तिप्रयोगस्य वाक्यानि लिखति आचार्यः । छात्राध्यापकयोः पदक्रीडा रामः – रामाय । पुस्तकम् पुस्तकाय । शाला – शालायै । | विभक्तिवल्लरीपुस्तकं प्राप्नोतु । भिन्नवर्णसुधाखण्डेन चतुर्थी/ पञ्चमीविभक्त्यन्तपदानि लिखतु । समानकर्तृक्रियावाक्यमध्ये भिन्नपदानां चतुर्थी/पञ्चमीविभक्ति प्रयोजनं भवतु । |
| २०. विंशतितमदिनम् | षष्ठीविभक्तिपरिचयः | षष्ठ्यन्तपदानि । रामस्य, कृष्णस्य, गुरोः, पुस्तकस्य, हरेः इत्यादीनि पदानि । | सम्बन्धसूचकस्य षष्ठ्यन्तस्य उपयोगेन वाक्यानि लिखति आचार्यः । छात्राः पठन्ति । शाला– शालायाः । गुरुः – गुरोः इति परिवर्तनं कुर्वन्ति छात्राः । | आचार्यः प्रस्तुतविभक्तियुक्तानां वाक्यानां चित्रपटं प्राप्नोतु । रामः दशरथस्य पुत्रः । एवमेव अन्योदाहरणानि विलिख्य चित्राणि संयोजयतु । अकाराकरेकारान्तपदानि एव उपयोजयतु । |
| २१.एकविंशतितमं दिनम् | सप्तवासरज्ञानम् । | सोमवासरः, मङ्गलवासरः, बुधवासरः एवं सर्वे वासराः । | कक्ष्यायां वासरक्रीडाः । अद्य – श्वः – परश्वः – प्रपरश्वः इति अग्रिमदिनां वाचनं भवति । ह्यः परह्यः प्रपरह्यः इति सूचनेन गतवासराणां परिचयः भावति । एवं क्रीडा प्रचलति । | अध्यापकः चित्रपटान् निर्मीय आनयतु । कृष्णफलके रेखागणितस्य वर्तुलाकारेण चित्रं रचयित्वा सप्तवासराणां परिचयं कारयतु । बहुवर्णसुधाखण्डस्य उपयोगः भवतु । |

| | | | | |
|---|---|---|---|---|
| २२. द्वाविंशतितमं दिनम् | तिङन्तानां परिचयः । | धातुः+विकरणप्रत्ययः+तिङ् वर्तमानकालस्य लट् लकास्य परिचयः । प्रथमपुरुषः – मध्यमपुरुषः – उत्तमपुरुषः । पठति–पठतः–पठन्ति ....... सर्वरूपाणि | चार्ट् द्वारा क्रीडा भवति । चित्रपटरचनं भवति आचार्यस्य मार्गदर्शनेन । छात्रगणेषु नव तिङन्तरूपाणां लेखनं भवति । | लकारपुरुषवचनसूचनस्य प्रश्नोत्तरस्य अभ्यासं कारयतु । नवरूपाणां कण्ठपाठार्थं स्वयम् उच्चारयतु अनुवाचयतु । अन्यधातूनां नव रूपाणि छात्रद्वारा लेखयतु । |
| २३. त्रयोविंशतितमं दिनम् | प्रश्नस्य सप्तककाराः । | कति, कुत्र, कदा, किमर्थम्,कथम् ,कियत् ,किम्(सुबन्तानि) | सरलवाक्यानि बोधयित्वा तस्य प्रशनपरिवर्तनपूर्वकं किम् – रूपाणां परिचयः । कुत्र कति इत्यादीनां प्रत्येकं वाक्यद्वारा परिचयः। | एतदर्थं चार्ट् निर्माणं करोतु । कुत्र कति इत्यादीनि क कारपदानि अन्यवर्णेन लिखतु । यूट्यूब् तः अनुरूपाणि सङ्ग्रह्णातु । |
| २४. चतुर्विंशतितमं दिनम् | मासानां परिचयः । | चैत्रवैशाखादि मासानां नामानि, वसन्तेत्यादिषट् ऋतूनां नामानि च । | पञ्चाङ्गपुस्तकम् आनीय आचार्यः ६ ऋतूनां १२ मासानां परिचयं कारयति । मासानाम् ऋतूनां च सम्यक् योजनस्य चित्रपटस्य निर्माणं कारयति । | मासचक्रस्य चित्ररचनं करोतु । छात्रैः ऋतुमाससंयोजनस्य चित्रं लेखयतु । |
| २५. पञ्चविंशतितमं दिनम् | शरीराङ्गानां परिचयः । | शिरः, नासिका, हस्तः बाहुः उरः, नेत्रे, कर्णौ, पादौ अङ्गुली इत्यादीनि | आचार्यः स्वदेहस्य प्रदर्शनयोग्यानि अङ्गानि प्रदर्श्य नमानि वदति । | आचार्यः मानवदेहस्य सिद्धवर्णचित्रस्य सङ्ग्रहं करोति। यदि चित्ररचनचतुरच्छात्रेण |

| | | | | |
|---|---|---|---|---|
| | | अङ्गनामानि । | तेषां लिङ्गज्ञानं भवतु । देहस्य सिद्धचित्रं प्राप्य अङ्गानां बाणसूचनपूर्वकं नामलेखनं भवति । | कृष्णफलके चित्रं लेखयतु । अन्ये छात्राः क्रमशः अङ्गानां नाम लिखन्तु । |
| २६. षड्विंशतितमं दिनम् | सरलसम्भाषणज्ञानम् । | गुरुशिष्यसम्भाषणम् । मातापुत्रसम्भाषणम् । | आचार्यः स्वमित्रं दूरवाण्या सम्पर्कं कृत्वा सम्भाषणं प्रदर्शयति । अन्यशिक्षकस्य सहयोगेन छात्रौ अपि सरलवाक्यैः आचार्यसाहाय्येन सम्भाषणं कुरुतः । | गुरुः संस्कृतभारत्याः सम्भाषणशिबिरस्य किट् स्वीकरोतु । केन्द्रीयसंस्कृतविश्वविद्यालयस्य वेब् पोर्टल् मध्ये वीडियो सन्ति तदपि छात्रलभ्यानि करोतु । व्यवहारसाहस्री पुस्तकं प्राप्नोतु |
| २७.सप्तविंशतितमं दिनम् | सरलसम्भाषणज्ञानम् । | वैद्यरोगिसम्भाषणम् । | आचार्यः स्वमित्रं दूरवाण्या सम्पर्कं कृत्वा सम्भाषणं प्रदर्शयति । वैद्यरोगिसम्भाषणं करोति । अन्यशिक्षकस्य सहयोगेन वैद्यरोगिसम्भाषणं करोति । छात्रौ अपि सरलवाक्यैः आचार्यसाहाय्येन सम्भाषणं कुरुतः । | शिक्षकः विविधरीत्या सभ्भाषणम् आयोजयतु । छात्रैः सह परस्परं सभ्भाषणम् कर्तुं अवकाशं कल्पयतु । |
| २८. अष्टविंशतितमं दिनम् | भविष्यत् कालपरिचयः । | लृट् लकारः । त्रिषुपुरुषवचनेषु पठ् धातोः रूपाणि । पठिष्यति पठिष्यतः | श्यामफलके आचार्यः टेबल् कृत्वा पुरुषवचनैः सह ९ रूपाणि लिखति । | नवरूपाणां चार्ट् निर्माणं करोतु । विविधधातूनां लृट् रूपाणि पूर्वलिखितानि प्रदर्शयतु । |

| | | | | |
|---|---|---|---|---|
| | | पठिष्यन्ति ।<br>पठति – पठिष्यति ।<br>इत्यादयः | लट् रूपैः सह तुलनां कृत्वा सादृश्यं दर्शयति । छात्राः आचार्यम् अनुसरन्तः रटन्ति । | स्पोरकपत्राणां सिद्धता भवतु । |
| २९. नवविंशतितमं दिनम् | संस्कृतगीतगानम् । | संस्कृतवातवरणनिर्माणार्थं स्तोत्रसुभाषितेभ्यः भिन्नानि आधुनिकगीतानि ।<br>मनसा सततं .......<br>चटक चटक रे......<br>राघावमाधव.....<br>पुत्री मम खलु...... इत्यादीनि | आचार्यः सुन्दरगीतानि सुस्वरेण गायति । छात्राः गानासक्ताः श्रुण्वन्ति । क्रमेण छात्राः अपि अनुगायन्ति । छात्रेभ्यः सरलगीतानि दत्वा वाचयति गुरुः । | यूटूब् माध्यमात् गीतानि अवतारयतु । दृश्यश्रव्ययन्त्रस्य उपयोगः भवतु । |
| ३०. त्रिंशतितमं दिनम् | लघुकथापरिचयः । | काकस्य कथा, याचकस्य कथा, पिपीलिकानां कथा, | साभिनयं शिक्षकः कथाः श्रावयति । छात्राः तु कथाश्रवणरुचयः एव । ते अपि कथा कथनस्य प्रयत्नं कुर्वन्ति कन्नडभाषासङ्करेण । | लघुकथापुस्तकसङ्ग्रहः । यूट्यूब् तः कथाकथनस्य चलच्चित्रानि अवतारयतु । संस्कृतभारती अत्रत्य कथा पुस्तकं सङ्ग्रह्णातु । |